"श्वा शृगालो वृको ऋक्षो व्याड़ः कङ्कस्तथा-
क्रमात् ॥")

इन्द्रः । इति शब्दरत्नावली ॥ वञ्चकः । इति रायमुकुटः ॥

**व्याड़ायुधं**, क्ली, ( व्याडस्य व्याघ्रस्यायुधं नख-मिव । ) व्याघ्रनखाख्यगन्धद्रव्यम् । इत्यमरः ॥

**व्याड़िः**, पुं, कोषकारमुनिविशेषः । तत्पर्य्यायः । विन्ध्यवासी २ नन्दिनीतनयः ३ । इति हेमचन्द्रः ॥ विन्ध्यस्थः ४ नन्दिनीसुतः ५ । इति त्रिकाण्डशेषः ॥

**व्यात्तं**, त्रि, (वि + आ + दा + क्तः ।) प्रसारितम् । विस्तृतम् । यथा,—

"सट्टोर्द्धकर्णं गिरिकन्दराद्भुत-
व्यात्तास्यनासं हनुभेदभीषणम् ।
दिवि स्पृशत्कायमदीर्घपीवर-
ग्रीवोरुवक्षःस्थलमल्पमध्यमम् ॥"

इति श्रीभागवते ७ स्कन्धे ८ अध्यायः ॥

गिरिकन्दरवत् अद्भुतं व्यात्तं प्रसृतमास्यं नासे च यस्मिन् । इति तट्टीकायां श्रीधरस्वामी ॥

**व्यात्युक्षी**, स्त्री, ( व्यतिहारेण उक्षणम् । वि + आ + अति + उक्ष + "कर्म्मव्यतीहारे णच् स्त्रियाम् ।" ३।३।४३। इति णच् । ततः "णचः स्त्रियामञ् ।" ५।४।१४। इति अञ् । "टिड्ढाण-ञिति ।" ४।१।१५। इति ङीप् ।) रसिकानाम-न्योन्यं जलक्रीड़नम् । इति संक्षिप्तसारोणादि-वृत्तिः ॥ तत्पर्य्यायः जलक्रीड़ाशब्दे द्रष्टव्यः ॥

**व्यादिशः**, पुं, ( विशेषेणादिशति स्वस्वकर्म्मणि नियोजयति जगत् । वि + आ + दिश + कः । ) विष्णुः । यथा,—

"अनन्तरूपोऽनन्तश्रीर्जितमन्युर्भयापहः ।
चतुरस्रो गभीरात्मा विदिशो व्यादिशो दिशः ॥"

इति महाभारते तस्य सहस्रनामस्तोत्रम् ॥

**व्याधः**, पुं, ( विध्यति मृगादीन् । व्यध + "श्याद्व्य-धेति ।" ३ । १ । १४१ । इति णः । ) मृग-हिंसकजातिः । शिकारी इति भाषा । स तु सर्व्वस्त्रियां क्षत्त्रियाज्जातः । यथा,—

"नापितात् गोपकन्यायां सर्व्वस्त्री तस्य योषिति ।
क्षत्त्राद्बभूव व्याधश्च बलवान् मृगहिंसकः ॥"

इति ब्रह्मवैवर्त्ते ब्रह्मखण्डे १० अध्यायः ॥

तत्पर्य्यायः । मृगवधाजीवः २ मृगयुः ३ लुब्धकः ४ । इत्यमरः ॥ मृगावित् ५ द्रोहाटः ६ । इति जटाधरः ॥ मृगजीवनः ७ बलपांशुनः ८ । इति शब्दरत्नावली ॥ ( यथा,—

"भित्त्वा मृगी व्याधशिलीमुखेन
मृगोऽपि तत्कातरवीक्षणेन ।
असून् परित्यज्य गतव्यथा सा
मृगस्य जीवावधिराविरासीत् ॥"

इत्युद्भटः ॥ )

दुष्टः । इति मेदिनी ॥ ( यथा, भागवते । ३ । १४ । २४ ।

"व्याधस्याप्यनुकम्प्यानां स्त्रीणां देवः सती-
पतिः ॥" )

**व्याधभीतः**, पुं, ( व्याधाद्भीतः । ) मृगः । इति शब्दचन्द्रिका ॥ ( व्याधभीते, त्रि ॥ )

**व्याधामः**, पुं, वज्रम् । इति हेमचन्द्रः ॥

**व्याधिः**, पुं, (विविधा आधयोऽस्मात् । यद्वा, वि + आ + धा + "उपसर्गे घोः किः ।" ३ । ३ । ९२ । इति किः । ) कुष्ठम् । रोगः । इत्यमरः ॥ ( यथा, महाभारते । १२ । १६ । ८ ।

"द्विविधो जायते व्याधिः शारीरो मानस-
स्तथा ।
परस्परं तयोर्जन्म निर्द्वन्द्वं नोपलभ्यते ॥" )

कामव्याधासन्तापजन्यकृशता । इति रसमञ्जरी ॥ कुष्ठस्य निदानं यथा,—

"व्यालोकनमनस्यौत्यक्रीड़ाविषयचेष्टितैः ।
विरोधरूक्षभीहर्षविषादाद्यैश्च दूषितः ॥
पुंस्त्रीत्वाद्बलभ्रंशशोथचित्ताश्रवज्वरान् ।
सर्व्वाकाराङ्गनिस्तोदं रोमहर्षं सुप्तताम् ॥
कुष्ठं विमथमन्यच्च कुर्य्यात् सर्व्वाङ्गमार्द्दवम् ॥"

इति गारुड़े १७२ अध्यायः ॥

अन्यत् कुष्ठशब्दे द्रष्टव्यम् ॥ * ॥ अथ कुष्ठस्य चिकित्सा ।

"वातोत्तरेषु सर्पिर्व्वमनं कफोत्तरेषु कुष्ठेषु ।
पित्तोत्तरेषु मोक्षो रक्तस्य विरेचनं श्रेष्ठम् ॥
पथ्याकरञ्जसिद्धार्थनिशावल्गुजसैन्धवैः ।
विड़ङ्गसहितैः पिष्टैर्लेपो मूत्रेण कुष्ठनुत् ॥"

अवल्गुजः वाकुचीति लोके । पथ्यादिभि-र्लेपः ॥ * ॥

"सोमराजीभवचूर्णं शृङ्गवेरसमन्वितम् ।
उद्वर्त्तनमिदं हन्ति कुष्ठरोगं क्षताश्रयम् ॥"

सोमराजी वाकुचीति लोके । सोमराज्युद्-वर्त्तनम् ॥ * ॥

"रसायनं प्रवक्ष्यामि ब्रह्मणा यदुदाहृतम् ।
मार्कण्डेयप्रभृतिभिर्यत् प्रयुक्तं महर्षिभिः ॥
पुष्पकाले तु पुष्पाणि फलकाले फलानि च ।
संगृह्य पिचुमर्दस्य त्वङ्मूलानि दलानि च ।
द्विरंशानि समाहृत्य भागिकानि प्रकल्पयेत् ।
त्रिफला त्र्यूषणं ब्राह्मी श्वदंष्ट्रारुष्कराग्नयः ॥
विड़ङ्गसारवाराहीलोहचूर्णाः स्मृताः समाः ।
निशाद्वयावल्गुजकव्याधिघाताः सशर्कराः ॥
कुष्ठमिन्द्रयवाः पाठाः चूर्णमेषान्तु संयुतम् ।
खदिरासननिम्बानां घनं क्वाथेन भावयेत् ॥
सप्तधा पञ्चनिम्बन्तु मार्कवस्वरसेन च ।
स्निग्धः शुद्धतनुर्धीमान् योजयेत्तच्छुभे दिने ॥
मधुना तिक्तहविषा खदिरासनवारिणा ।
लेह्यमुष्णाम्भसा वापि कोलवृद्ध्या पलं भवेत् ।
जीर्णे तस्मिन् समश्नीयात् स्निग्धं लघु हितं च
यत् ॥

विचर्च्चिकोदुम्बरपुण्डरीक-
कपालदद्रुकिटिभालसादि ।
शतारुविस्फोटविसर्पमालाः
कफप्रकोपं त्रिविधं किलासम् ॥
भगन्दरश्लीपदवातरक्त-
जड़ान्ध्यनाड़ीव्रणशीर्षरोगान् ।
सर्व्वान् प्रमेहान् प्रदरांश्च सर्व्वान्
दंष्ट्राविषं मूलविषं निहन्ति ॥
स्थूलोदरः सिंहकृशोदरः स्यात्
सुश्लिष्टसन्धिर्मधुनोपयोगात् ।
सदोषरोगादपि ये दशन्ति
सर्पादयो यान्ति विनाशमाशु ॥
जीवेच्चिरं व्याधिजराविमुक्तः
शुभे रतिश्चन्द्रसमानकान्तिः ॥"

अयमर्थः । निम्बस्य फलपुष्पत्वक्पत्रमूलानि सर्व्वाणि समुदितानि द्विगुणानि चूर्णितानि भृङ्गराजस्य रसेन सप्तवारान् भावयेत् । त्रिफलादीनि पाठान्तानि समुदितान्येक-भागानि चूर्णितानि खदिरासननिम्बानां निविड़क्वाथेन भावयेत् । ततः सर्व्वमेकीकृत्य मध्वादिनावलिह्यात् । पञ्चनिम्बकावलेहः ॥ * ॥ शशिलेखापञ्चपलं तावत्त्रिदिवस्य गुग्गुलो-र्दश च ।

ताप्यस्य पलचितयं द्वे लोहाच्छादनिकायाः ॥
त्रिफलाकरञ्जफलखदिरगुडूचीत्रिवृद्दन्त्यः ।
मुस्ताविड़ङ्गरजनीकुटजवल्गुनिम्बचित्र-
सम्पाकाः ॥

एते रचितां वटिकां मधुघृतमिश्रां गिलेत्-
प्रातः ।
गोमूत्रेण च कुष्ठं शुद्धत्यचिरात् वातमचिरेण ॥
शिवाणि पाण्डुरोगं विषमाशुदरप्रमेह-
गुल्मांश्च ।
नाशयति वलीपलितं योगः स्वायम्भुवो नाम्ना ॥
शशिलेखा सोमराजी । त्रिदिवस्य शिला-जतुनः । ताप्यस्य स्वर्णमाक्षिकस्य । भात्रशिका मुक्तीति लोके । स्वायम्भुवो गुग्गुलुः ॥ * ॥

"चित्रकं त्रिफला व्योषमजाजी कारवी वचा ।
सैन्धवातिविषे कुष्ठं चव्यैलायावशूकजम् ॥
विड़ङ्गान्यजमोदा च मुस्ता चामरदारु च ।
यावन्त्येतानि सर्व्वाणि तावन्मात्रन्तु गुग्गुलुः ॥
संक्षुद्य सर्पिषा सार्द्धं गुटिकां कारयेद्भिषक् ।
प्रातर्भोजनकाले च खादेदग्निबलं यथा ॥
हन्त्यष्टादश कुष्ठानि क्रिमीन् दुष्टव्रणानि च ।
ग्रहण्यर्शोविकारांश्च मुखामयगलग्रहान् ॥
गृध्रसीमस्थिभङ्गञ्च गुल्मञ्चापि नियच्छति ।
व्याधिं कोष्ठगतांश्चापि जयेद्विष्णुरिवासुरान् ॥"

एकविंशतिको गुग्गुलुः ॥ * ॥

"वातरक्ताधिकारोक्तः पुरः कैशोरकाभिधः ।
कुष्ठानां वातरक्तानां नाशयेत् परमौषधम् ॥"

इति कैशोरको गुग्गुलुः ॥ * ॥

"भल्लातकं प्रस्थयुगं छित्त्वा द्रोणजले क्षिपेत् ।
प्रस्थद्वयं गुड़ूच्याश्च खण्डं तत्राम्भसि क्षिपेत् ॥
चतुर्थांशावशेषन्तु कषायमवतारयेत् ।
वस्त्रपूते कषाये च वक्ष्यमाणानि निक्षिपेत् ॥
शरावमात्रं गोसर्पिर्गोदुग्धस्याढकं तथा ।
सितां प्रस्थमितां दद्यात् प्रस्थार्द्धमाक्षिकं क्षिपेत्
सर्व्वाण्येकत्र भाण्डे तु पचेत् मृदग्निना शनैः ।
सर्व्वद्रव्ये घनीभूते पावकादवतारयेत् ॥